## प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा।

संस्कृत व्याख्याः विधिसूत्रमिदम्। अष्टाध्याय्याः द्वितीयाध्यायस्य तृतीयपादस्य षट् चत्वारिंशत् सूत्रम्। पदं पदं प्रतिपदम्। प्रतिपदे भवं प्रातिपदिकम् । प्रातिपदिकस्यार्थः प्रातिपदिकार्थः । प्रातिपदिकार्थश्च, लिङ्गञ्च, परिमाणञ्च, वचनञ्च, तेषामितरेतरयोगद्वन्द्वसमासः । प्रातिपदिकार्थलिङ्गपरिमाणवचनानि एव प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रम्, तस्मिन् प्रातिपदिकार्थलिङ्ग-परिमाणवचनमात्रे प्रथमा। प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे सप्तम्यन्तं, प्रथमा प्रथमान्तं द्विपदमिदं सूत्रम् । तत्र द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्वध्यते इति न्यायेन द्वन्द्वान्ते श्रूयमाणस्य मात्रशब्दस्य प्रत्येकं द्वन्द्वावयवैः सह सम्बन्धो भवति। ततश्च प्रातिपदिकार्थमात्रे लिङ्गमात्रे परिमाणमात्रे वचनमात्रे च प्रथमाविभक्तिः भवतीति वाक्यं निष्पद्यते। अत्र लिङ्गमात्रे इत्यस्य स्थाने लिङ्गमात्राधिक्ये इत्यर्थः वोध्यः। कारणं हि न कुत्रापि लिङ्गमात्रस्य प्रतीतिः भवति । एवं परिमाणमात्रे इत्यस्य स्थानेऽपि परिमाणमात्राधिक्ये इत्यर्थो वोध्यः । तत्र कस्मात् प्रथमा भवतीतिजिज्ञासायामत्र प्रातिपदिकात् इति सम्बध्यते। सुपांप्रातिपदिकादेव विधानात् । एवञ्च प्रातिपदिकार्थमात्रे प्रातिपदिकात् प्रथमाविभक्तिः भवति। लिङ्गः मात्राधिक्ये प्रातिपदिकात् प्रथमाविभक्तिः भवति । परिमाणमात्राधिक्ये प्रथमाविभक्तिः भवति। वचनमात्रे प्रातिपदिकात् प्रथमाविभक्ति भवतीति। अत्र क्रमेण उदाहरणं प्रस्तुयते

(क) प्रातिपदिकमात्रे प्रातिपदिकात् प्रथमा विभक्तिः भवति। अस्मिन् सूत्रे प्रातिपदिकार्थपदेन नियतोपस्थितिकस्यैव अर्थस्य ग्रहणं भवति। अर्थात् यस्मात् प्रातिपदिकात् यस्य अर्थस्य नियमेन सर्वदा उपस्थितिः भवति, स एव अर्थः प्रातिपदिकार्थः भवति। यथा राम इति प्रातिपदिकात् रामत्वं, राम, पुंस्त्वम् इति त्रयाणामर्थानां नियमेन सर्वदा उपस्थितिः भवति, तस्मात् रामशब्दस्य रामत्वं, राम, पुंस्त्वम् इत्येते त्रयः अर्थाः प्रातिपदिकार्थाः भवन्ति।

(ख) लिङ्गमात्राधिक्ये प्रातिपदिकात् प्रथमाविभक्तिः भवति यथा तटः तटी तटम् । अत्र तटशब्दः नियतोपस्थितिकयोः तटतटत्वयोः वोधको वर्तते अपि च अनियतलिङ्गस्यापि वोधको वर्तते ।

परिमाणमात्रे प्रातिपदिकात् प्रथमाविभक्तिः भवति। यथा, द्रोणो ब्रीहिः इत्यत्र परिमाणवोधकं नातिपदिकमस्ति द्रोणः । तस्मात् परिमाणे अर्थे प्रथमाविभक्तिः भवति ।

जचनमात्रे प्रथमाविभक्तिः यथा परिमाणं संख्या इति। उदाहरणानि तावत् एकः द्वौ पहवः । एकशब्दस्य एकत्वम् इत्यर्थस्तु नियतः वर्तते। एकं द्विशब्दस्य द्वित्वरूपः अर्थः नियतः अस्ति। तस्मात् प्रातिपदिकार्थमात्रे प्रथमा इति अनेनैव एकादिशब्देभ्यः प्रथमा भवितुमर्हति ।